शास्त्री-II साहित्य

रघुवंश त्रयोदशः सर्गः

प्रश्न पद्यमिदम् व्याख्येयम् ।

तां तामवस्थां प्रतिपद्यमानं स्थितं दश व्याप्य दिशो महिम्ना
विष्णोरिवास्यानवधारणीयमीदृक्तया रूपमियत्तया वा ॥

उत्तरम् प्रसंगः— प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य त्रयोदश सर्गात् उद्धृतोऽस्ति।
अस्मिन् श्लोके श्रीरामः सीतां प्रति यात्रा प्रकारं वर्णयितुमुपक्रमते—
विविधामवस्थां प्रतिपद्यमानस्य विशालतया सकला अपि दिशो व्याप्तवतोऽस्य समुद्रस्य वास्तविकं स्वरूपं भगवतो विष्णोरिव निर्णेतुं न शक्यते। अर्थादस्य वास्तविकम् स्वरूपं न निश्चेतुं शक्यमस्तीति भावः।

व्याख्या:— तां ताम् = विविधप्रकाराम् । अवस्थाम् = स्थितिम् । प्रतिपद्यमानम् = भजमानम् । महिम्ना = महत्त्वेन । दश = दशसंख्याकः दिशः = आशाः, व्याप्य = व्याप्ता विधाय । स्थितम् = वर्तमानम् विष्णोरिव = भगवतो हरेरिव । अस्य = समुद्रस्य । रूपम् = स्वरूपम् । ईदृक्तया = ईदृशत्वेन । इयत्तया वा = इदं परिमाणत्वेन वा । अनवधारणीयम् = निश्चेतुमशक्यः ।

Renu Devi
30/08/20

राधा उमा कान्त सं० महावि० सुखसेना, पूर्णिया

उपशास्त्री ... तृतीय - पत्रम
रघुवंश महाकाव्यम् - द्वितीयः सर्गः

Date

प्र० (।) - पद्यमिदम् व्याख्येयम् ।
गुरोः सदारस्य निपीड्य पादौ समाप्य सान्ध्यञ्च विधि दिलीपः
दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ।।

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके राजा दिलीपः अरुन्धती गुरोः गुरुपत्न्याश्च पादौ प्रणम्यं कृतवति -
बाहुबलसमुद्धृतशत्रुः राजा दिलीपः धेन्वा सहाश्रमे परावर्त्य गुरोः गुरुपत्न्याश्च पादौ प्रणम्य सायं सन्ध्यावन्दनादिकं कृत्यं कृत्वा शयनार्थमासीनां नन्दिनी पुनरपि सेवितवान् । रात्रौ तदन्तिके एव स्थितवानिति भावः

व्याख्याः - भुजोच्छिन्नरिपुः = बाहुन्मूलितारिः, दिलीपः = राजा, सदारस्य = सपत्नीकस्य, गुरोः = कुलगुरोः वसिष्ठस्य, पादौ = चरणौ, निपीड्य = अभिवाद्य प्रणम्य, किञ्च सान्ध्यं = सायङ्कालिकं सन्ध्योपासनादिकं कर्म, समाप्य = विधाय, दोहावसाने = दुग्धदोहनसमाप्यनन्तरम्, निषण्णां = उपविष्टां समासीनां वा, दोग्ध्रीं = कामदुग्धां, तां धेनुं पुनरेव = भूयोऽपि भेजे = सिषेवे ।

Renu Devi
30/08/20
राधा उमाकान्त सं० महावि० सुरवसेना, पूर्णिया ।

Page No.

शास्त्री - I साहित्य

अभिज्ञान शाकुन्तलम

चतुर्थोऽङ्कः

Date

उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं वाष्पं कुरु स्थिरतया विहतानुबन्धम्।
अस्मिन्नलक्षितनतोन्नतभूमिभागे मार्गे पदानि खलु ते विषमीभवन्ति॥

प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य चतुर्थोऽङ्कात् उद्धृतोऽस्ति।

अस्मिन् श्लोके कण्वः शकुन्तलायै रोदनं न केवलं ममङ्गलमेव प्रत्युत मार्गगमनावरोधीत्युत्प्रेक्ष्य महर्षिः कण्वः कथयति - उत् = ऊर्ध्वं पक्ष्मणी ययोः ते तयोः उत्पक्ष्मणोः = उद्गतनेत्ररोम्णोः, नयनयोः उपरुद्धवृत्तिं = उपरुद्धा = व्याहता वृत्तिः = दर्शनव्यापारो येन तं उपरुद्धवृत्तिं = प्रतिहतदर्शनशक्ति वाष्पं = अश्रुजलम् स्थिरतया धैर्येण विहितः = दूरीकृतः, धैर्यमवलम्ब्य नेत्रजलं निवर्तयेति भावः। अलक्षितः = अनाकलितं नतः = निम्नः = उन्नतः = उच्चश्च, भूमिभागः = भूप्रदेशः यस्मिन् स तस्मिन् अलक्षित नतोन्नत भूमिभागे मार्गे = गन्तव्ये पथि ते = तव पदानि = चरणन्यासाः विषमी भवन्ति = स्खलन्ति, उच्चावचेषु निपतन्तीत्यर्थः। अत्र परिकर - काव्यलिङ्गालङ्कारौ बसन्ततिलका वृत्तं च।

Renu Devi
30/08/20

राधाउमाकान्त सं० महावि० सुखसेना, पूर्णिया।

उपशास्त्री-I साहित्य - तृतीय-पत्रम्

रघुवंश महाकाव्यम्-द्वितीयः सर्गः

- पद्यमिदम् व्याख्येयम् ।

प्र०(1) वसिष्ठधेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात् ।
पपौ निमेषालसपक्ष्मपङ्क्तिरुपोषिताभ्यामिव लोचनाभ्याम् ॥

उत्तरम् - प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति ।

प्रस्तुत श्लोके अत्युत्कण्ठिता निर्निमेषलोचना सुदक्षिणा नन्दिनीमनुसृत्य वनात् निवर्तमानं राजानं दिलीपम् अपश्यदित्यर्थः । यथा कृतोपवासो मानवोऽतितृषितो भवति, तथैव तस्यानयने अत्युत्सुकतया अपश्यतामिति भावः ।

व्याख्या - वनिता = दिलीप भार्या सुदक्षिणा, वसिष्ठधेनोः = नन्दिन्याः अनुयायिनं = अनुचरम्, वनान्तात् = काननप्रान्तभागात्, आवर्तं = आश्रमं प्रत्यागच्छन्तम्, तं = दिलीपम्, उपोषिताभ्याम् = कृतोपवासाभ्याम्, औत्सुक्येन = तृषिताभ्याम्, इव = यथा, लोचनाभ्यां = नयनाभ्याम्, पपौ = निर्निमेषं ददर्श ।

Renu Devi
30/08/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।